# Shri Chidambaradigbandhanamalamantrah

# श्रीचिदम्बरदिग्बन्धनमालामन्त्रः

## Document Information

Text title : Shri Chidambaradigbandhanamalamantrah

File name : chidambaradigbandhanamAlAmantraH.itx

Category : shiva, mAlAmantra, mantra, bIjAdyAkSharamantrAtmaka

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 13, 2023

*sanskritdocuments.org*

# श्रीचिदम्बरदिग्बन्धनमालामन्त्रः

ॐ अस्य श्री चिदम्बरमालामन्त्रस्य, सदाशिव ऋषिः, महा विराट् छन्दः, श्रीचिदम्बरेश्वरो देवता । हं बीजं, सः शक्तिः, सोऽहं कीलकं, श्रीमच्चिदम्बरेश्वरप्रसादसिद्ध्यर्थे जपे विनियोगः ।
ॐ ह्रीं श्रीं ह्रां शिवाय नमः । अङ्गुष्ठाभ्यां नमः ।
ॐ ह्रीं श्रीं ह्रीं मशिवायन । तर्जनीभ्यां नमः ।
ॐ ह्रीं श्रीं ह्रूं नमः शिवाय । मध्यमाभ्यां नमः ।
ॐ ह्रीं श्रीं ह्रैं यनमशिवा । अनामिकाभ्यां नमः ।
ॐ ह्रीं श्रीं ह्रौं वायनमशि । कनिष्ठिकाभ्यां नमः ।
ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रम् । करतलकरपृष्ठाभ्यां नमः ।
एवं हृदयादिन्यासः । भूर्भुवस्सुवरोमिति दिग्बन्धः ।
ध्यानम्-
लोकानाहूय सर्वान् डमरुकनिनदैः घोरसंसारमग्नान्
दत्वाऽभीतिं दयालुः प्रणत भयहरं कुञ्चितं पादपद्मम् ।
उद्धृत्येदं विमुक्तेरयनमिति करैः प्राणिनां प्रत्ययार्थं
बिभ्रद्वह्निं सभायां कलयति नटनं यः स पायाच्छिवो नः ॥

लमित्यादिपञ्चपूजा ।
१. ॐ नमो भगवते आनन्दताण्डवेश्वराय जटामकुटधराय चन्द्रशेखराय विष्णुवल्लभाय श्रीशिवकामसुन्दरीमनोहराय पञ्चाक्षरपरिपूर्णाय ॐ लं लं लं लौं इन्द्रद्वारं *बन्धय बन्धय मां रक्ष रक्ष । मम शत्रून् भक्षय भक्षय । मम सर्वकार्याणि साधय साधय । सर्वदुष्टग्रहान्बन्धय बन्धय । हुं फट् स्वाहा (१) ॥

१. बन्धय .....स्वाहा इति प्रतिमन्त्रमनुवर्तते ।

२. ॐ नमो भगवते ऊर्ध्वताण्डवेश्वराय व्याघ्रचर्माम्बरधारण प्रियाय कृष्णसर्पयज्ञोपवीताय अनेककोटिब्रह्मकपालमालालङ्कृताय

श्री शिवकामसुन्दरीमनोहराय पञ्चाक्षरपरिपूर्णाय ॐ रं रं रं रौं
अग्निद्वारं बन्धय .....स्वाहा ।

३. ॐ नमो भगवते उन्मत्ततताण्डवेश्वराय उग्रत्रिणेत्राय
भस्मोद्धूलितविग्रहाय रुद्राक्षमालाभरणाय श्रीशिवकामसुन्दरी
मनोहराय पञ्चाक्षरपरिपूर्णाय ॐ हं हं हं हौं यमद्वारं बन्धय .....स्वाहा ।

४. ॐ नमो भगवते हुङ्कारताण्डवेश्वराय
त्रिशूलडमरुककपालमृगहस्ताय नीलकण्ठाय निरञ्जनाय
श्रीशिवकामसुन्दरी मनोहराय पञ्चाक्षरपरिपूर्णाय ॐ षं षं षं षौं
निर्ऋति द्वारं बन्धय .....स्वाहा ।

५. ॐ नमो भगवते उग्रत्रिशूलताण्डवेश्वराय चन्द्रशेखराय
गङ्गाधराय परशुहस्ताय श्रीशिवकामसुन्दरी मनोहराय
पञ्चाक्षरपरिपूर्णाय ॐ वं वं वं वौं वरुणद्वारं बन्धय .....स्वाहा ।

६. ॐ नमो भगवते विजयताण्डवेश्वराय उरगमणिभूषणाय
शार्दूलचर्मवसनाय सकलरिपुरम्पटविमोचनाय श्री शिवकामसुन्दरी
मनोहराय पञ्चाक्षरपरिपूर्णाय ॐ यं यं यं यौं वायुद्वारं बन्धय .....स्वाहा ।

७. ॐ नमो भगवते भीमताण्डवेश्वराय भूतप्रेत-
पिशाचब्रह्मराक्षस संहारकाय अनेककोटिप्रमथगण पूजिताय
श्रीशिवकामसुन्दरीमनोहराय पञ्चाक्षरपरिपूर्णाय ॐ सं सं सं सौं
कुबेरद्वारं बन्धय .....स्वाहा ।

८. ॐ नमो भगवते उग्रताण्डवेश्वराय अघोरवीरभद्राट्टहासाय
कालहन्त्रे वायुवेगाय चञ्चलस्वरूपाय श्रीशिवकामसुन्दरी मनोहराय
पञ्चाक्षरपरिपूर्णाय ॐ शं शं शं शौं ईशानद्वारं बन्धय .....स्वाहा ।

९. ॐ नमो भगवते अमृतताण्डवेश्वराय आकाशगमनाय
नन्दिवाहनप्रियाय गजचर्माम्बरधराय श्रीशिवकामसुन्दरी मनोहराय
पञ्चाक्षरपरिपूर्णाय ॐ ठं ठं ठं ठौं आकाशद्वारं बन्धय .....स्वाहा ।

१०. ॐ नमो भगवते संहारताण्डवेश्वराय अपमृत्युविनाशनाय
कालमृत्युसंहारकारणाय अनेककोटिभूतग्रहमर्दनाय सकललोक-
नायकाय श्रीशिवकामसुन्दरीमनोहराय पञ्चाक्षरपरिपूर्णाय ॐ क्षं क्षं क्षं
क्षौं अन्तरिक्षद्वारं बन्धय .....स्वाहा ।

११. ॐ नमो भगवते अघोरताण्डवेश्वराय आभिचारविच्छेदनाय सर्वरक्षाकरेश्वराय परमानन्दस्वरूपाय श्रीशिवकामसुन्दरी मनोहराय पञ्चाक्षरपरिपूर्णाय ॐ न्यं न्यं न्यं न्यौं पातालद्वारं बन्धय .....स्वाहा ।

१२. ॐ नमो भगवते प्रलयकालताण्डवेश्वराय शशाङ्कशेखराय अनेककोटिगणनाथसेवितप्रियाय समस्तभूतप्रेतपिशाचदमनाय कालदेशपञ्चकाचञ्चलस्वरूपाय श्रीशिवकामसुन्दरी मनोहराय पञ्चाक्षरपरिपूर्णाय ॐ यं यं यं यौं आकर्षय आकर्षय । ब्रह्मराक्षसग्रहान् आकर्षय आकर्षय । बन्धय बन्धय । भक्षय भक्षय । ज्वालय ज्वालय । शोषय शोषय । क्ष्म्रौं कृं खं खेचरस्वरूपाय नागग्रहं आकर्षय आकर्षय । आवेशय आवेशय ।

१३. ॐ नमो भगवते आदिचिदम्बरेश्वराय पतञ्जलिव्याघ्रपाद सेवितप्रियाय अनेककोटिभूत लोकनायकाय अचञ्चलस्वरूपाय मम आत्मानं रक्ष रक्ष । परमन्त्रान् छिन्धि छिन्धि । परयन्त्रान् छिन्धि छिन्धि । ज्रां ज्रां ज्रां ज्रौं ह्रीङ्कार नाथाय श्रीङ्कारपीठाय क्लीङ्काररूपाय ओङ्कारमनुपाय राजग्रहं स्तम्भय स्तम्भय । चोरग्रहं स्तम्भय स्तम्भय । अनुभोगग्रहं स्तम्भय स्तम्भय । मूकग्रहं स्तम्भय स्तम्भय । म्लेच्छग्रहं स्तम्भय स्तम्भय । यक्षिणीग्रहं स्तम्भय स्तम्भय । कामिनीग्रहं स्तम्भय स्तम्भय ।

१४. ॐ नमो भगवते श्रीचिदम्बरेश्वराय जटामकुटधराय कृष्णसर्पयज्ञोपवीताय व्याघ्रचर्माम्बरधराय अनेककोटि-नागभूषिताय ॐ सौं सौं सौं सौं श्रीचिदम्बरेश्वराय बालग्रहं संहर संहर । ज्वालाग्रहं संहर संहर । ज्वरग्रहं संहर संहर । उच्छिष्टग्रहं संहर संहर । गन्धर्वग्रहं संहर संहर ।
देवताग्रहं संहर संहर । क्लीं क्लीं क्लीं (क्लौं) क्लीङ्काररूपाय
हं हं हं हौं अनावृतनृत्तप्रियाय टीं टीं टीं
ऐङ्कारप्रियाय आदिचिदम्बरेश्वराय ग्रामदेवताग्रहं स्तम्भय स्तम्भय । झटिकग्रहं स्तम्भय स्तम्भय । झौटिकग्रहं स्तम्भय स्तम्भय । शिव शिव हर हर आं लं लं लं लौं स्तम्भय स्तम्भय । आतोषय आतोषय । क्रां क्रीं क्रोडय । ह्रां ह्रीं ह्रौं मारय मारय शत्रून् । द्रां द्रीं द्रौं विद्रावय विद्रावय द्विषतः । दह दह । पच पच । दं दं दं दौं दमय दमय आद्रावय आकर्षय आवेशय आवेशय शिवद्रोहपातकान् नाशय नाशय ।

१५. ॐ नमो भगवते युगप्रपञ्चताण्डवेश्वराय उग्रत्रिणेत्राय रुद्राय पञ्चाक्षरपरिपूर्णाय रुद्राक्षमालाभरणाय भस्मोद्धूलितविग्रहाय एकाहज्वरं शमय शमय । त्र्यहज्वरं मासज्वरं द्वैमासिकज्वरं त्रैमासिकज्वरं षाण्मासिकज्वरं वत्सरज्वरं पित्तज्वरं श्लेष्मज्वरं (कफज्वरं) वातज्वरं सर्वज्वरं शमय शमय ।

१६. ॐ नमो भगवते महोग्रताण्डवेश्वराय रुद्राज्ञापरिपालनाय सर्वशत्रुसंहारकाय ॐ यं यं यं यौं ज्वालामुखग्रहं उच्चाटय उच्चाटय । शक्तिग्रहं उच्चाटय उच्चाटय । डाकिनीग्रहं उच्चाटय उच्चाटय । शाकिनीग्रहं उच्चाटय उच्चाटय । कूष्माण्डग्रहं उच्चाटय उच्चाटय । भेतालग्रहं उच्चाटय उच्चाटय । द्वात्रिंशद् यक्षिणीर्मोहय मोहय हुं फट् स्वाहा ।

१७. ॐ नमो भगवते सर्वसंहारताण्डवाय प्रलयाग्नि प्रभाय सहस्रशिरोभिर्युताय द्विसहस्रभुजाय चत्वारिंशत्सहस्रनखाय सकलायुधपाणिने वज्रताण्डवाय वज्रदेहाय सदाशिवाय स्वतन्त्रपरिपालकाय स्वमन्त्रपरिपालकाय स्वयन्त्रपरिपालकाय ॐ क्षं क्षं क्षं क्षौं विष्णुवल्लभाय चतुष्कोटिपिशाचान् आकर्षय आकर्षय । षोडश गणपतीन् आकर्षय आकर्षय । अष्टकोटि भैरवान् आकर्षय आकर्षय । नवकोटिदुर्गाः आकर्षय आकर्षय । दशकोटिकालीः आकर्षय आकर्षय । सप्तकोटिशास्तॄन् आकर्षय आकर्षय । पञ्चकोटिकूष्माण्डान् आकर्षय आकर्षय । नवकोटिरुद्रान् आकर्षय आकर्षय । अष्टकोटिविष्णुग्रहान् आकर्षय आकर्षय । पञ्चकोटि-ब्रह्मग्रहान् आकर्षय आकर्षय । पञ्चकोटि इन्द्रग्रहान् आकर्षय आकर्षय । कालदण्डान् ताडय ताडय । सप्तकोटि पैशाचान् आकर्षय आकर्षय । प्रें प्रैं कालपाशेन बन्धय बन्धय । भीषय भीषय ज्वालय ज्वालय । शोषय शोषय । उच्चाटय उच्चाटय । मारय मारय । हुं फट् स्वाहा ।

१८. ॐ नमो भगवते अट्टहासमहाभीमताण्डवेश्वराय भक्तगणसंरक्षकाय सर्वमृत्युनिवारणाय सर्वरोगशमनाय सर्वशत्रून् शीघ्रं संहर संहर । अमृतानन्दस्वरूपाय ॐ हुं हुं हुं हुङ्कारनाथाय वज्रकवचाय पं पं पं पौं श्री शिवकामसुन्दरीमनोहराय आभिचारं

छिन्धि छिन्धि । ॐ हौं हौं हौं अनन्तस्वरूपाय सकलदेवतासेविताय सकलजनसेविताय सर्वसम्मोहनाय श्रीचिदम्बरेश्वराय नादहरिप्रियाय विष्णुवाद्यप्रियाय बाणासुरसेविताय ब्रह्मवाद्यप्रियाय तुम्बुरुनारद-सेविताय कल्याणीरागप्रियाय चन्द्रसूर्य सेविताय लक्ष्मीसेविताय समस्तगणवाद्यघोषप्रियाय श्री आनन्दताण्डवेश्वराय शिव शिव शिव शरणम् । शिवानन्दरूपाय ओङ्कारमण्डपाय श्रीचिदम्बरेश्वराय नमो नमस्ते । ॐ ॐ ॐ ॐ ॐ श्रीं ह्रीं ऐं क्लीं सौः हंस हंस हर हर
शिव शिव नमो नमस्ते ।

यः चिदम्बरमालामन्त्रमधीते स सर्वसिद्धिं लभते । स सर्वसौभाग्यं लभते लभत इति ।

हृदयादिन्यासः । भूर्भुवस्सुवरों इति दिग्विमोकः । ध्यानम् ।
लमित्यादि । गुह्यातिगुह्य गोप्ता त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देव त्वत्प्रसादान्मयि स्थिरा । इति समर्पयेत् ।

इति श्रीचिदम्बरदिग्बन्धनमालामन्त्रः सम्पूर्णः ।

Proofread by Aruna Narayanan

*Shri Chidambaradigbandhanamalamantrah*

pdf was typeset on July 13, 2023

Please send corrections to *sanskrit@cheerful.com*